# 64. महर्षिदयानन्दः

(दयानन्दगुणगौरवम्)

गुणानामाधारो विहित-श्रुतिशास्त्रार्थनिचयः,
समुद्धर्ता भर्ता पतितजनचित्तार्तिहरणः।
नयन्नात्मोत्सर्गं परहितरतः स्वार्थरहितो,
दयानन्दः स्वामी जयतु भुवने भास्कररुचिः॥ (कपिलस्य)

**महर्षिदयानन्दस्य जीवनवृत्तम्**—भारतवर्षस्य समाजसुधारकेषु महर्षेः दयानन्दस्य सर्वोत्कृष्टं स्थानं वर्तते। **जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते** इत्यनुसारेण जन्ममूलां जातिप्रथां निरस्य गुणकर्मानुसारं वैदिकशास्त्रसम्मितां वर्णव्यवस्थामुदघोषयत्। स्वनामधन्यस्य तस्य दयानन्दस्य जन्म गुजरात-प्रान्तान्तर्गत-काठियावाडजनपदे 'टंकार'-नाम्नि ग्रामे 1824 ईसवीये वर्षे अभवत्। अस्य पितुः नाम 'श्रीकर्षण तिवारी' आसीत्। अस्य मातुः नाम रुक्मिणी आसीत्। सः च परमशिव-भक्तोऽभवत्। दयानन्दस्य जन्मनाम मूलशङ्करः जातः। एकस्मिन् दिवसे शिवरात्रि-पर्वणि पितुः आज्ञया अनेन बालकेन उपवासः कृतः। पित्रा सह शिवमन्दिरे रात्रौ स शिवपूजायां निमग्न आसीत्। तदैव अनेन बालकेन शिवलिङ्गस्य उपरि कूर्दन् तत्र मिष्ठान्नं भक्षयन् एकः मूषकः दृष्टः। एतत् दृष्ट्वा मूलशंकरः अतीव निराशः अभवत्। अनेन चिन्तितं यत् यः शंकरः स्वरक्षायाम् असमर्थः सः कथं जगतः प्राणिनां रक्षां करिष्यति। अतः नैव शिवलिङ्गम् एतत् वास्तविकः परमेश्वरः। तदा स सत्यं शिवम् अन्वेष्टुं प्रतिज्ञातवान्। अतः तस्याम् अवस्थायाम् एव एष बालः मूलशंकरः परमात्मानम् अन्वेष्टुं गृहं पितरौ च परित्यज्य संन्यासी अभवत्। अनेकैः पण्डितैः सह मिलितवान्। अनेकानि च अनेन पुस्तकानि पठितानि, किन्तु नैव शान्तिर्लब्धा। ततश्च स्वामी-पूर्णानन्द-सरस्वती-महाभागस्य समीपम् अगच्छत्, तत्रैव च नर्मदातीरे संन्यासदीक्षा गृहीता अनेन, तस्मादेव कालाद् 'दयानन्द सरस्वती' जातोऽयं मूलशंकरः बालकः।

ततो हिमालयं प्राप्य तपश्चक्रे। तदनन्तरं अयं मथुरायां प्रज्ञाचक्षुषो गुरु-विरजानन्दस्य शिष्यः अभवत्। तस्मात् एव पाणिनि-व्याकरणं पठित्वा अनेन पूर्णब्रह्मचर्यं धारितम्। वर्षत्रय-अनन्तरं विद्यायाः समाप्तिः सञ्जाता, गुरुणा आदिष्टोऽयं दयानन्दः—वत्स! गच्छ, भारतवर्षे अज्ञानग्रस्ताः जनाः अनेकान् क्लेशान् सहन्ते, तेषां उद्धारं कुरु समाजे प्रचलितान् कुरीतिजालान् छिन्धि, वेदविद्यां विद्योतय, शास्त्राणि समुल्लासय, भुवने वैदिकधर्मज्योतिः प्रज्वालय, सत्यशास्त्राणि समुद्धर, मतमतान्तरप्रसारिताम अविद्यानिशीथिनीम् अपसारय इति। एषा खलु मम दक्षिणा भविष्यति।

अतः अस्मिन् क्षेत्रे अनेन सर्वाणि कार्याणि कृतानि। काश्यां 1. नवम्बर, 1869